श्रीव्यासमहर्षिप्रोक्तं

# श्रीब्रह्मवैवर्तपुराणम्

प्रथमभागे भूमिकाविषयानुक्रमणीभ्यां

द्वितीयभागे विषयानुक्रमणीश्लोकानुक्रमणीभ्यां च सहितम्

---

# BRAHMAVAIVARTAPURĀṆA

OF

## KṚṢṆA DVAIPĀYANA VYĀSA

*(With Introduction in Sanskrit and English in Part I and an Alphabetical Index of Verses in Part II)*

सम्पादक - आचार्य जगदीशलालशास्त्री

भूमिकानुक्रमणीरचयिता - [illegible]पुरोपाध्यायशर्मा

प्रथमो भागः

राष्ट्रिय-संस्कृत-संस्थानम्

नई दिल्ली

# BRAHMAVAIVARTAPURĀṆA

## OF

## KṚṢṆA DVAIPĀYANA VYĀSA

*(With Introduction in Sanskrit and English in Part I and an Alphabetical Index of Verses in Part II)*

*Edited by*
PROF. J.L. SHASTRI

*Index & Introduction by*
SATKARI MUKHOPADHYAYA

PART I

RASHTRIYA SANSKRIT SANSTHAN
NEW DELHI

श्रीव्यासमहर्षिप्रोक्तं

# श्रीब्रह्मवैवर्तपुराणम्

प्रथमभागे भूमिकाविषयानुक्रमणीभ्यां
द्वितीयभागे विषयानुक्रमणीश्लोकानुक्रमणीभ्याञ्च सहितम्

सम्पादकः
आचार्य जगदीशलालशास्त्री
भूमिकाऽनुक्रमणीरचयिता
सातकडिमुखोपाध्यायशर्मा

प्रथमो भागः

राष्ट्रिय-संस्कृत-संस्थानम्
नई-दिल्ली

# आमुखम्

सुविदितं विदुषां यत् पुराणानि प्राचीनभारतस्य इतिहास-विद्या-कला-स्थापत्य-शिल्प-साहित्यशास्त्रप्रभृतिविषयाणां ज्ञानस्य प्रथमसाधनभूतानि समाजे प्रतिष्ठितानि वर्तन्ते। यदपि पुराणविद्या महापुराणोपुराणभेदेन द्विधा कल्प्यते तथापि वेदमार्गोपवृंहण-परत्वात् द्वयोरपि समानं महत्त्वं स्वीक्रियते। अस्माकं प्रत्नैः अष्टादशसंख्यानां पुराणग्रन्थानां संकेतभाषया इत्थं परिगणनं कृतम् -

मद्वयं भद्वयं चैव बत्रयं वचतुष्टयं।
अनापल्लिंगकूस्कानि पुराणनि पृथक् पृथक् ॥ इति।

तेन मद्वयमिति मात्स्य-मार्कण्डेये, भद्वयमिति भविष्यद्भागवते, बत्रयमिति ब्रह्माण्ड-ब्रह्म-ब्रह्मवैवर्तानि, वचतुष्टयमिति वामन-विष्णु-वायु-वाराहपुराणानि, अ-अग्निपुराणं, ना-नारदीयं, प-पाद्मं, लिं-लैंगं, ग-गारुडं, कू-कौर्मं, स्क-स्कान्दं च पुराणम्। एकैकस्याप्यस्य संप्रदायानुगुणम् उपपुराणमपि दृश्यते। ऊनविंशतिशतके सर्वाण्यपि पुराणानि इतस्ततः प्रकीर्णाध्यायानि समग्रतया दुर्लभान्यासन्। तस्मिन् काले भारतीयवाङ्मयस्य प्रकाशकाः केचन पुण्यकर्माणः पुराणानां अपि प्रकाशनं कृतवन्तः। तत्रापि मुम्बईस्थक्षेमराजप्रेसद्वारा प्रथमतः सम्यक् संशोधितं रूपं संस्कृतविदुषां साहाय्येन प्राकाश्यं नीतम्। प्रथमं पत्राकारूपेण वाचनपठनसौकर्याय पुराणानां प्रकाशनमभूत्। महता प्रयासेन धनव्ययेन च प्रकाशितचराः ईदृशाः ग्रन्थाः कालान्तरे दुर्लभतां गताः। तेन च संस्कृताध्ययन-अनुसन्धानक्षेत्रे काठिन्यम् अनुभूयमानमासीत् भारतशासनान्तर्गतमानवसंसाधनविकास-मन्त्रालयस्य प्रकाशितचराणां दुर्लभानां च ग्रन्थानां पुनर्मुद्रणात्मकपरियोजनायां पुनर्मुद्रिताः अपि इमे ग्रन्था कालक्रमेण भूयोऽपि दुर्लभतां गताः। अतः द्वितीयवारमपि पुनर्मुद्रणं कारयत्वा पुस्तकानां सुलभता सम्पादनीया इत्येतत् मन्त्रालयस्य संकल्पमनु ग्रन्थरत्नस्यास्य पुनमुर्द्रणं प्रकाशनं च विधीयमानमस्ति।

सन्दर्भेऽस्मिन् अपेक्षितं मार्गदर्शनं तथा शुभसन्देशं च प्रदाय राष्ट्रियसंस्कृतसंस्थानं समेधितवद्भ्यः मानवसंसाधनविकासमन्त्रिवर्येभ्यः डॉ० मुरलीमनोहरजोशीमहाभागेभ्यः आधमर्ण्यं वहामि। संस्थानस्य अर्थसमितेः अध्यक्षेभ्यः निर्णयस्यास्य स्वीकारे सहकृतवद्भ्यः संस्थानस्य उपाध्यक्षेभ्यः श्री नी० गोपालस्वामी महोदयेभ्यः हार्दान् धन्यवादान् व्याहरामि। प्राशासनिकं साहाय्यं विधाय कार्यसाफल्याय सहकृतवत्यै मानवसंसाधनविकासमन्त्रालयस्य भाषाविभागे संयुक्तचिवयै श्रीमत्यै बेला बैनर्जीमहाभागायै तथा अन्येभ्यश्च तद्विभागीयाधिकारिभ्यः धन्यवादान् व्याहरामि। संकल्पस्यास्य साकारतासम्पादने योग्यं प्रयासं कृतवन्तं संस्थानस्य शोधप्रकाशनविभागस्य सहायकनिदेशकं डा० प्रकाशपाण्डेयं तदनुयायिकार्यकर्तृगणं च साधुवादैः सम्भावयामि।

योग्ये काले सुन्दरं पुनर्मुद्रणं विधाय उपकृतवते मोतीलालबनारसीदास मुद्रणालयस्य पतये श्री नरेन्द्रप्रकाश जैन महोदयाय साधुवादान् व्याहरामि। आशासे यत् भूयः कृतेन अनेन द्वितीयपुनर्मुद्रणप्रयत्नेन संस्कृतविद्वांसः संस्कृतच्छात्राः संस्कृतप्रेमिणश्च लाभान्विताः प्रेरिताश्च भवेयुः इति।

दिनाङ्कः २२.५.२००२

*संस्कृतसेवक :*
वेम्पटिकुटुम्बशास्त्री
निदेशकः
राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली।

णमापन्ना ध्यानेन वचसाऽपि वा ॥ निरापदस्ते निश्शङ्का जरा मृत्युश्च तैर्जितः ॥ ४८ ॥ साक्षाद्ये शरणापन्नास्तत्फलं किं वदामि
भोः ॥ हरिस्मृतिश्चाभयदा सर्वमङ्गलदा सदा ॥ ४९ ॥ किं मे भक्तस्य भविता तन्मे ब्रूहि जगत्प्रभो ॥ श्रीहतस्यास्य मूढस्य सूर्य्य
शापेन हेतुना ॥ ५० ॥ श्रीभगवानुवाच ॥ कालोऽतियातो दैवेन युगानामेकविंशतिः ॥ वैकुण्ठे घटिकार्द्धेन शीघ्रं याहि नृपालयम् ॥
॥५१॥ वृषध्वजो मृतः कालाद्दुर्निवार्य्यात्सुदारुणात् ॥ हंसध्वजश्च तत्पुत्रो मृतः सोऽपि श्रिया हतः ॥५२॥ तत्पुत्रौ च महाभागौ
धर्मध्वजकुशध्वजौ ॥ हतश्रियौ सूर्य्यशापात्तौ वै परमवैष्णवौ ॥ ५३ ॥ राज्यभ्रष्टौ श्रिया भ्रष्टौ कमलातांपसावुभौ ॥ तयोश्च
भार्य्ययोर्लक्ष्मीः कलया च जनिष्यति ॥५४॥ सम्पद्युक्तौ तदा तौ च नृपश्रेष्ठौ भविष्यतः ॥ मृतस्ते सेवकः शम्भो गच्छ यूयं च
गच्छत॥५५॥इत्युक्त्वा च सलक्ष्मीकः सभातोऽभ्यन्तरं गतः ॥ देवा जग्मुश्च संहृष्टाः स्वाश्रमं परमं मुदा ॥५६॥ शिवश्च तपसे शीघ्रं
परिपूर्णतमो ययौ॥५७॥इति श्रीब्रह्मवैवर्त्ते महापुराणे द्वितीये प्रकृतिखण्डे नारदनारायणसंवादे तुलस्युपाख्याने त्रयोदशोऽध्यायः॥१३॥
नारायण उवाच ॥ लक्ष्मीं तौ च समाराध्य चोग्रेण तपसा मुने ॥ प्रत्येकं वरमिष्टं च संप्रापतुरभीप्सितम् ॥ १ ॥ महालक्ष्म्या
वरेणैव तौ पृथ्वीशौ बभूवतुः॥धनवन्तौ पुत्रवन्तौ धर्मध्वजकुशध्वजौ॥२॥ कुशध्वजस्य पत्नी च देवी मालावती सती ॥ सा सुषाव
च कालेन कमलांशां सुतां सतीम् ॥ ३ ॥ सा च भूतलसम्बन्धाज्ज्ञानयुक्ता बभूव ह ॥ कृत्वा वेदध्वनिं स्पष्टमुत्तस्थौ सूतिकागृहे
॥ ४ ॥ वेदध्वनिं सा चकार जातमात्रेण कन्यका ॥ तस्मात्तां ते वेदवतीं प्रवदन्ति मनीषिणः ॥ ५ ॥ जातमात्रेण सुस्नाता जगाम
तपसे वनम् ॥ सर्वैर्निषिद्धा यत्नेन नारायणपरायणा ॥ ६ ॥ एकमन्वन्तरं चैव पुष्करे च तपस्विनी ॥ अत्युग्रां वै तपस्यां तु
लीलया च चकार सा ॥ ७ ॥ तथाऽपि पुष्टा न कृशा नवयौवनसंयुता ॥ शुश्राव खे च सहसा सा वाचमशरीरिणीम् ॥ 
॥ ८ ॥ जन्मान्तरे ते भर्त्ता च भविष्यति हरिः स्वयम् ॥ ब्रह्मादिभिर्दुराराध्यं पतिं लप्स्यसि सुन्दरि ॥ ९ ॥

१ रथ इति पाठः। २ तपसाविति पाठः।

इति श्रुत्वा तु सा हृष्टा चकार च पुनस्तपः ॥ अतीव निर्जनस्थाने पर्वते गन्धमादने ॥ १० ॥ तत्रैवं सुचिरं तप्त्वा विश्वस्य
समुवास सा ॥ ददर्श पुरतस्तत्र रावणं दुर्निवारणम् ॥ ११ ॥ दृष्ट्वा साऽतिथिभक्त्या च पाद्यं तस्मै ददौ किल ॥
सुस्वादु फलमूलं च जलं चापि सुशीतलम् ॥ १२ ॥ तच्च भुक्त्वा स पापिष्ठश्चावात्सीत्तत्समीपतः ॥ चकार प्रश्नमिति तां
का त्वं कल्याणि चेति च ॥ १३ ॥ तां च दृष्ट्वा वरारोहां पीनोन्नतपयोधराम् ॥ शरत्पद्मनिभास्यां च सस्मितां सुदतीं
सतीम् ॥ १४ ॥ मूर्च्छामवाप कृपणः कामबाणप्रपीडितः ॥ तां करेण समाकृष्य सम्भोगं कर्त्तुमुद्यतः ॥ १५ ॥
सा सती कोपदृष्ट्या च स्तम्भितं तं चकार ह ॥ स जडो हस्तपादैश्च किंचिद्वक्तुं न च क्षमः ॥ १६ ॥ तुष्टाव मनसा
देवीं पद्मांशां पद्मलोचनाम्॥सा तत्स्तवेन सन्तुष्टा प्राकृतं तं मुमोच ह॥१७॥शशाप च मदर्थे त्वं विनश्यसि सबान्धवः ॥ स्पृष्टाऽहं
च त्वया कामाद्विसृजाम्यवलोकय ॥ १८ ॥ इत्युक्त्वा सा च योगेन देहत्यागं चकार ह ॥ गंगायां तां च संन्यस्य स्व
गृहं रावणो ययौ ॥ १९ ॥ अहो किमद्भुतं दृष्टं किं कृतं वा मयाऽधुना ॥ इति संचिन्त्य संस्मृत्य विललाप पुनः पुनः ॥
॥ २० ॥ सा च कालान्तरे साध्वी बभूव जनकात्मजा सीतादेवीति विख्याता यदर्थे रावणो हतः ॥ २१ ॥ महातपस्विनी सा
च तपसा पूर्वजन्मनः ॥ लेभे रामं च भर्त्तारं परिपूर्णतमं हरिम् ॥२२॥ संप्राप्य तपसाऽऽराध्य स्वामिनं च जगत्पतिम्॥ सा रमा
सुचिरं रेमे रामेण सह सुन्दरी ॥२३॥ जातिस्मरा स्म स्मरति तपसश्च क्रमं पुरा ॥ सुखेन तज्जहौ सर्वं दुःखं चापि सुखं लभेत् ॥
॥ २४ ॥ नानाप्रकारविभवं चकार सुचिरं सती ॥ सम्प्राप्य सुकुमारं तमतीव नवयौवनम् ॥ २५ ॥ गुणिनं रसिकं शान्तं कान्तवे
षमनुत्तमम् ॥ स्त्रीणां मनोज्ञं रुचिरं तथा लेभे यथेप्सितम् ॥ २६ ॥ पितुर्वचःपालनार्थं सत्यसन्धो रघूत्तमः जगाम काननं पश्चा
त्कालेन च बलीयसा ॥ २७ ॥ तस्थौ समुद्रनिकटे सीतया लक्ष्मणेन च ॥ ददर्श तत्र वह्निं च विप्ररूपधरं हरिः ॥ २८ ॥ तं
रामं दुःखितं दृष्ट्वा स च दुःखी बभूव ह ॥ उवाच किंचित्सत्येष्टं सत्यं सत्यपरायणः ॥ २९ ॥ वह्निरुवाच॥ भगवञ्छ्रूयतां वाक्यं

श्रीव्यासमहर्षिप्रोक्तं

# श्रीब्रह्मवैवर्तपुराणम्

प्रथमभागे भूमिकाविषयानुक्रमणीभ्यां

द्वितीयभागे विषयानुक्रमणीश्लोकानुक्रमणीभ्याञ्च संवलितम्

---

# BRAHMAVAIVARTAPURĀṆA

OF

KṚṢṆA DVAIPĀYANA VYĀSA

*(With Introduction in Sanskrit and English in Part I and an Alphabetical Index of Verses in Part II)*

सम्पादक - आचार्य जगदीशलालशास्त्री

भूमिकाऽनुक्रमणीरचयिता - सत्यव्रतसिंहमुखोपाध्यायशास्त्री

## द्वितीयो भागः

राष्ट्रिय-संस्कृत-संस्थानम्

नई दिल्ली

# BRAHMAVAIVARTAPURĀṆA

OF

## KṚṢṆA DVAIPĀYANA VYĀSA

*(With Introduction in Sanskrit and English in Part I and an Alphabetical Index of Verses in Part II)*

*Edited by*
PROF. J.L. SHASTRI

*Index & Introduction by*
SATKARI MUKHOPADHYAYA

PART II

RASHTRIYA SANSKRIT SANSTHAN
NEW DELHI

श्रीव्यासमहर्षिप्रोक्तं

# श्रीब्रह्मवैवर्तपुराणम्

प्रथमभागे भूमिकाविषयानुक्रमणीभ्यां
द्वितीयभागे विषयानुक्रमणीश्लोकानुक्रमणीभ्याञ्च सहितम्

सम्पादकः
आचार्य जगदीशलालशास्त्री
भूमिकाऽनुक्रमणीरचयिता
सातकडिमुखोपाध्यायशर्मा

द्वितीयो भागः

राष्ट्रिय-संस्कृत-संस्थानम्
नई-दिल्ली

# अथ ब्रह्मवैवर्तमहापुराणान्तर्गतश्रीकृष्णजन्मखंडविषयानुक्रमणिका ।


| पत्रम् | अध्यायः | विषयाः | श्लोकाः |
|---|---|---|---|
| १ | १ | नारदस्य नारायणं प्रति श्रीकृष्णजन्मखंडकथाविषयकप्रश्नः, श्रीनारायणकृता विष्णुवैष्णवयोर्गुणप्रशंसा च ... ... | ६५ |
| २ | २ | यतो हरेर्गोपवेषेण गोकुलागमनं तथा येन राधा गोपालिका जाता तत्कारणकथनं, नारदस्य श्रीदाम्नो राधायाश्च कलहविषयप्रश्नः, रत्नमंडपे विरजासक्तं श्रीहरिं सखीमुखाच्छ्रुत्वा कुपिताया राधिकाया रत्नमंडपगमनं, राधाशब्दश्रवणतो हरेरदर्शनं दृष्ट्वा भीत्या विरजया कृतं प्राणत्यागपूर्वक नदीरूपधारणं च ... ... ... ... | ६८ |
| ४ | ३ | सप्तसमुद्रोत्पत्तिः, कोपमंदिरद्वारि श्रीदाम्ना सहागतं हरिंप्रति पुनः पुना राधोक्तिः, हरिं निर्गमयितुमाज्ञप्तानां सखीनां तं प्रति वचनानि राधां प्रति श्रीहरिमहत्त्ववर्णनात्मकं श्रीदाम्नो वचनं, राधाश्रीदाम्नोः परस्परं शापः, शापदुःखाकुली राधाश्रीदामानौ प्रति समाधानकारकं श्रीहरिवचनं च ... ... | ११७ |
| ७ | ४ | सुरैः सह शरणागतां धरां प्रति ब्रह्मणो वचनम्, ब्रह्मप्रश्नतस्तस्मै केषां भारो मेऽसह्यस्तद्धरया कथनम्, धरया सुरसं- | |

| पत्रम् | अध्यायः | विषयाः | श्लोकाः |
|---|---|---|---|
| | | घैश्च सह शिवलोकं गतेन ब्रह्मणा शिवाय धरावृत्तकथनम्, ससुरधराणां ब्रह्मेशधर्माणां वैकुंठे गमनम्, ब्रह्मेशधर्मकृतं श्रीहरिस्तोत्रम्, श्रीहर्याज्ञया सर्वदेवानां गोलोकगमनं गोलोकवर्णनं च ... ... ... ... ... ... | १८० |
| १२ | ५ | राधामंदिरषोडशद्वाराणां वर्णनम्, षोडशद्वारातिक्रमोत्तरं राधाभ्यंतरगृहे देवानां गमनं, राधामदिरवर्णनम्, देवै राधामंदिरे श्रीकृष्णतेजःस्वरूपस्य दर्शनं, ब्रह्मेशधर्मकृतः श्रीकृष्णस्तवराजः, तत्पठनफलकथनं च ... ... ... | १२६ |
| १५ | ६ | पूर्वदृष्टतेजःस्वरूपमध्ये देवैरालोकितायाः कृष्णमूर्तेर्वर्णनम्, सुरकृतस्तवतुष्टेन श्रीकृष्णेन देवेभ्योऽभयदानम्, पृथिव्यामवतरणार्थं राधादिगोलोकस्थजनान् प्रति कृष्णस्याज्ञावचनम्, गोलोकसमागतानां नारायणविष्णुसंकर्षणानां श्रीकृष्णदेहे लीनता पृथिव्यां स्वस्वांशेनावतरणार्थं सकलदेवताभ्यः श्रीकृष्णस्याज्ञा, केन कुत्र किंनाम्नावतरणं कर्तव्यमिति ब्रह्मप्रश्नतः कृष्णेन तत्कथनम्, भाविविरहकातरया | |





| पत्रम् | अध्यायः | विषयाः | श्लोकाः |
|---|---|---|---|
| | | रुदतीं राधांप्राति श्रीकृष्णस्य बोधवचनम्, कृष्णाज्ञया सकलदेवतानां स्वस्वस्थाने गमनम्, कृष्णाज्ञया गोलोकाद्गोपगोपीगणैः सह राधाया गोकुले गमनम्, श्रीहरेर्मथुरागमनं च | २७८ |
| २२ | ७ | श्रीकृष्णजन्माख्यानम् ... ... ... ... | १३२ |
| २५ | ८ | श्रीकृष्णजन्माष्टमीव्रतोपवासविधानकथनम् ... ... | ८६ |
| २७ | ९ | नारदप्रश्नतो नारायणेन नन्दयशोदारोहिणीनां जन्मांतरवृत्तकथनम् बलदेवजन्माख्यानम्, नन्दपुत्रोत्सवकथनं च ... | ८० |
| २९ | १० | कंसप्रेरणया कृष्णं हंतुं नन्दगृहमागतायाः पूतनायाः कृष्णकृतस्तनपानेन मोक्षः पूतनाया जन्मान्तरकथनं च ... | ४६ |
| ३१ | ११ | तृष्णावर्तदैत्यवधः तज्जन्मांतरवृत्तकथनं च ... ... | ३५ |
| ,, | १२ | शकटासुरभंजनम्, योगनिद्रोक्तकवचन्यासश्च ... ... | ४२ |
| ३३ | १३ | वसुदेवकृतप्रार्थनया श्रीकृष्णस्य नामकरणादिसंस्कारकरणार्थं गर्गस्य नंदगृहे गमनम् गर्गेण स्वागमनप्रयोजनस्यश्रीकृष्णनामार्थस्य तथा पुरा शिवमुखाच्छ्रुतस्य गोलोकवृत्तस्य च नंदयशोदाभ्यां कथनम्, गर्गाज्ञया नंदेन कृष्णस्य नामकरणादिसंस्करणम्, गर्गकृतश्रीकृष्णस्तोत्रम्, गर्गस्य स्वगृहगमनम् ... ... ... ... ... | २४७ |
| ३९ | १४ | यमलार्जुनभंजनं, नलकूबरमोक्षः, वृक्षाख्यानं च... ... | ५४ |
| ४० | १५ | भांडीरवने राधाकृष्णयोर्विवाहः, नवसंगमप्रस्तावश्च ... | १७८ |
| ४४ | १६ | बकासुरवधः, प्रलंबासुरवधः केशिदैत्यवधः, एतेषां जन्मान्तरवृत्तांतः, पार्वत्या कृतस्य त्रैमासिकनामव्रतस्याविधिः, नन्दाज्ञया सर्वव्रजजनानां वृंदावने गमनं च ... ... | १७८ |

| पत्रम् | अध्यायः | विषयाः | श्लोकाः |
|---|---|---|---|
| ४९ | १७ | वृन्दावनवर्णनं तन्मध्येप्रसंगात्कलावत्या इतिहासः, वृन्दावननाम्नो व्युत्पत्त्यादि, राधायाः षोडशनामात्मकं स्तोत्रम्, तन्नाम्नां व्युत्पत्तिश्च ... ... ... | २६३ |
| ५५ | १८ | विप्रपत्नीमोक्षप्रस्तावः तन्मध्येविप्रपत्नीकृतं श्रीकृष्णस्तोत्रम् ... | १३१ |
| ५८ | १९ | कालियदर्पणदमनं, दावाग्निभक्षणं च ... ... ... | १८७ |
| ६३ | २० | ब्रह्मणा गोवत्सबालहरणप्रसंगतः कृतं श्रीकृष्णस्तोत्रम् ... | ५९ |
| ६४ | २१ | इंद्रयागभंजनम्, गोवर्धनोद्धरणं च ... ... ... | २३३ |
| ७० | २२ | धेनुकासुरवधः ... ... ... ... ... | १०२ |
| ७२ | २३ | तिलोत्तमावलिपुत्रयोर्ब्रह्मशापप्रस्तावः धेनुकासुरस्य पूर्वजन्मवृत्तांतश्च ... ... ... ... ... | १५० |
| ७६ | २४ | प्रसंगतोदुर्वासस आख्यानं, वलिपुत्रमोक्षश्च ... ... | ९० |
| ७८ | २५ | दुर्वाससं प्रत्यौर्वऋषेः शापस्तत्प्रसंगेनांबरीषाख्यानकथनं च | १५८ |
| ८२ | २६ | अंबरीषाख्यानप्रसंगतः एकादशीव्रतनिरूपणं च ... | ९३ |
| ८४ | २७ | गोपीवस्त्रापहरणाख्यानं, तन्मध्ये गोपीकृतं सर्वमंगलस्तोत्रम्, गौरीव्रतविधानादिकथनं, राधाकृतं पार्वतीस्तोत्रम्, श्रीकृष्णेन गोपिकाभ्योऽभीष्टवरदानं च ... | २४३ |
| ९० | २८ | रासक्रीडाख्यानम् ... ... ... ... | १७० |
| ९४ | २९ | अष्टावक्रमुनिमोक्षणाख्यानम् ... ... ... | ५३ |
| ९६ | ३० | राधाप्रश्नतोऽष्टावक्रस्येतिहासकथनम् ... ... ... | ११२ |
| ९८ | ३१ | राधाप्रश्नतः कृष्णेन ब्रह्मणः शापकारणकथनम्, तत्र प्रसंगात् सुचंद्रराजवृत्तकथनम्, मोहिन्या विरहातुरावस्यामोहिनी- | |

श्रीवंशीवदनस्य च ॥ किशोरगोपवेषस्य परिपूर्णतमस्य च ॥ ३९ ॥ तस्य भार्या स्वयं राधा महालक्ष्मीः परात्परा ॥ ब्रह्मस्वरूपा
परमा परमात्मानमीश्वरम् ॥४०॥ भजते सततं शान्तं सुरम्यं श्यामसुन्दरम् ॥ कोटिकन्दर्पसौन्दर्यनिन्दितं सुकलेवरम् ॥४१॥ अमू
ल्यरत्नाभरणं सत्यं च नित्यविग्रहम् ॥ पीताम्बरधरं रम्यं दातारं सर्वसंपदाम् ॥ ४२ ॥ श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ॥
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥४३॥ यन्निमेषो भवेद्वृन्दे ब्रह्मणः पतनेन च ॥ पञ्चविंशत्सहस्रेण युगेनेन्द्रस्य पातनम्
॥ ४४ ॥ चतुर्दशेन्द्रावच्छिन्नकालेन ब्रह्मणो दिनम् ॥ तावतीति निशा तस्य विधातुर्जगतामपि ॥ ४५ ॥ एवं त्रिंशद्दिनैर्मासं द्विषट्के
मासि वर्षकम् ॥ एवं शतायुस्तस्यैव निबोध बोधतत्परम् ॥४६॥ यावज्जीवनपर्यन्तं सेवन्ते सनकादयः ॥ कल्पानां कोटिकोटिं च
तन्न साध्यश्च यो विभुः ॥४७॥ सहस्रवक्त्रः शेषश्च सेवते च जपेत्सदा ॥ दिवानिशं च यं भक्त्या कल्पकोटिशतं शतम् ॥४८॥ तन्न
साध्यो हितकरो दुराराध्यः परात्परः॥ ब्रह्मा ब्रह्मस्वरूपं तं भजेज्जन्मनि जन्मनि॥४९॥वक्त्रैश्चतुर्भिः सततं स्तौति नित्यं सनातनम्॥
वेदेऽनिर्वचनीयश्च वेदानां जनको विधिः ॥५०॥ विधाता फलदाता च दाता च सर्वसंपदाम् ॥ तन्न साध्यो हि भगवान्कालकालान्त
कान्तकः ॥५१॥ संहारकर्ता जगतां कलया रुद्ररूपतः ॥ स स्तौति पञ्चवक्त्रैस्तु कोऽन्योऽन्यस्यापि का कथा ॥५२॥ तत्परश्च प्रियो
नास्ति वृन्दे भगवतः शृणु ॥ सर्वशक्तिस्वरूपा सा दुर्गा दुर्गतिनाशिनी ॥५३॥ ब्रह्मस्वरूपा परमा मूलप्रकृतिरीश्वरी ॥ नारायणी
विष्णुमाया वैष्णवी सा सनातनी ॥५४॥ यन्मायया जगद्भ्रान्तमनित्ये भ्रमते सदा ॥ सा स्तौति भक्त्या यं देवं वृन्देऽप्यंगे दिवानि
शम् ॥५५॥ स्तौति भक्त्या स्वशक्त्या च गजवक्त्रः षडाननः ॥ ध्यायते यं गणेशश्च सर्वादौ यस्य पूजनम्॥५६॥भगवान्सर्वदेवेशो
ज्ञानिनां च गुरोर्गुरुः ॥ सिद्धेन्द्रेषु च देवेन्द्रे योगीन्द्रे ज्ञानिनां गुरौ ॥५७॥ न गणेशात्परो विद्वान्गणेशश्च सुराधिपः॥सरस्वती च
यं स्तोतुमशक्ता परमेश्वरी ॥ ५८ ॥ दिवानिशं पादपद्मं भक्त्या पद्मा न सेवते ॥ यत्कटाक्षाज्जगत्सर्वं परिपूर्णतमं शिवम् ॥ ५९॥
यद्भयाद्वाति वातोऽयं सूर्यस्तपति यद्भयात् ॥ वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति जन्तुषु ॥६०॥ पृथिवी सेवया यस्य सर्वाधारा वसुन्धरा



समुद्रा निश्चलाः शैला यस्य भीताश्च सुन्दरि ॥ ६१ ॥ तीर्थसारा च सा गङ्गा पवित्रा मुक्तिदायिनी ॥ जगतां पावनी देवी यस्य
पादाब्जसेवया ॥ ६२ ॥ पवित्रा तुलसी देवी स्मरणाद्यस्य सेवनात् ॥ नवग्रहाश्च दिक्पाला भीता यस्य प्रतापतः ॥ ६३ ॥ ब्रह्मां
डेषु च सर्वेषु ब्रह्मविष्णुशिवात्मकाः ॥ अन्ये ये ये सुरेशाश्च शेषाद्या मुनयस्तथा ॥ ६४ ॥ केचित्कलास्वरूपाश्चाप्यंशरूपाश्च
केचन ॥ केचित्कलांशाः कृष्णस्य केचिच्च परमात्मनः ॥ ६५ ॥ पतिमिच्छसि कल्याणि प्रकृतेः परमीश्वरम् ॥ गोलोके राधिका
साध्यो नान्येषां च कदाचन ॥६६॥ मां भजस्व महाभागे नृपाणामीश्वरं पतिम् ॥ बलवन्तं च देवेभ्यो दैत्येभ्यश्च वरानने ॥ ६७ ॥
सुखानि यानि कल्याणि त्रिषु लोकेषु सन्ति वै ॥ भुङ्क्ष्व तान्येव सर्वाणि मत्प्रसादान्न संशयः ॥६८॥ सप्तसागरपारे च काञ्चनी
रुचिरा वरे ॥ देवानां क्रीडनार्थाय विधात्रा निर्मिता पुरी ॥ ६९ ॥ तत्रैव गच्छ भद्रं ते रम रामे मया सह ॥ महेन्द्रस्य प्रियवनं
पुष्पोद्यानसमन्वितम् ॥ ७० ॥ गच्छ स्वर्णमयीं लङ्कां नानारत्नविभूषिताम् ॥ तत्रैव गच्छ भद्रं ते रम रामे मया सह ॥ ७१ ॥
विस्पन्दकं सुवसनं नन्दकं पुष्पभद्रकम् ॥ तत्रैव० ॥ ७२ ॥ सुमेरुगह्वरं वाऽपि क्षीरोदं वा मनोहरम् ॥
तत्रैव० ॥ ७३ ॥ सत्यलोकं ब्रह्मलोकं रम्यं सद्म रहःस्थलम् ॥ तत्रैव० ॥ ७४ ॥ मलयं निलयं
रम्यं महेन्द्रसारनिर्मितम् ॥ सुगन्धियुक्तं सततं शुद्धं चन्दनवायुना ॥ ७५ ॥ मालती यूथिका रम्या केतकी माधवी तथा ॥
चारुचम्पकपुष्पाणां गन्धेन सुमनोहरम् ॥ तत्रैव० ॥७६॥ पिकानां भ्रमराणां च मधुरध्वनिसंयुतम् ॥ तत्रैव० ॥ ७७ ॥ इन्द्रस्य
वरुणस्यैव वायोरपि यमस्य च ॥ धनेश्वरस्य वह्नेश्च धर्मस्य शशिनस्तथा ॥ ७८ ॥ सुरम्यं लोकमेतेषां मध्ये देवि
यथेच्छसि॥तत्रैव० ॥७९॥ रत्नद्वीपं मणिद्वीपं रम्यं चन्द्रसरोवरम् ॥ तत्रैव०॥८०॥इत्येवमुक्त्वा संभोक्तुं गच्छन्तं तं छलेन च ॥
न वास्तवपरीक्षार्थं सतीत्वं बोधितुं व्रज ॥ ८१ ॥ उवाच सा नृपसुता कोपवक्त्रास्यलोचना ॥ हितं सत्यं योगयुक्तं धर्मार्थं च
यशस्करम् ॥ ८२ ॥ श्रीवृन्दोवाच ॥ धैर्यं कुरु महाभाग श्रेष्ठो जातिषु ब्राह्मणः ॥ ब्राह्मणानां तपो मूलं सत्यं वेदव्रतं